निमित्ताप्रणिहित विमोक्षमुखान्यभावो न भावस्तस्मान्महायानं
स देवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूतेऽभिज्ञा
भावोऽभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं लोकमभि-
भूयनिरयास्यत्। यस्मात्तर्हि सुभूते अभिज्ञाऽभावो न भावस्तस्मा-
न्महायानं स देवमानुषासुरं लोकमभिभूयनिर्याति। स चेत्
सुभूते समाधयो भावोऽभविष्यन्नाभावो नेदं महायानं स देव-
मानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते समा-
धयोऽभावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभि-
भूयनिर्याति। स चेत् सुभूते धारणीमुखानि भावोऽभविष्यन्ना-
भावो नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्।
यस्मात्तर्हि सुभूते धारणीमुखान्यभावो न भावस्तस्मान्महायानं
स देवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते तथा-
गतबलानि भावोऽभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं
लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते तथागतबलान्यभावो
न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्याति।
स चेत् सुभूते वैशारद्यानि भावोऽभविष्यन्नेदं महायानं स देव-
मानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते वैशार-
द्यान्यभावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभि-
भूयनिर्याति। स चेत् सुभूते प्रतिसम्विदोभावो अभविष्यन्नाभावो
नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्।
यस्मात्तर्हि सुभूते प्रतिसम्विदोऽभावो न भावस्तस्मान्महायानं स
देवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते महाकरुणा-



भावोऽभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं लोक-
मभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते महाकरुणाऽभावो न
भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्याति।
स चेत् सुभूते अष्टादशावेणिकाबुद्धधर्म्माभावोऽभविष्यन्नाभावो
नेदं महायानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्।
यस्मात्तर्हि सुभूते अष्टादशावेणिकाबुद्धधर्म्मा अभावो न भाव-
स्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्याति।

स चेत् सुभूते गोत्र भूधर्म्माभावोऽभविष्यन्नाभावो नेदं महा-
यानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि
सुभूते गोत्र भूधर्म्मा अभावो न भावस्तस्मान्महायानं स देवमानु-
षासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते अष्टमकधर्म्माभावो
ऽभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं लोकमभिभूय-
निरयास्यत्। यस्मात्तर्हि सुभूते अष्टमकधर्म्मा अभावो न
भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूयनिर्याति।
स चेत् सुभूते स्रोत आपन्नधर्म्माभावोऽभविष्यन्नाभावो नेदं मया-
यानं स देवमानुषासुरं लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि
सुभूते स्रोत आपन्नधर्म्मा अभावो न भावस्तस्मान्महायानं स
देवमानुषासुरं लोकमभिभूयनिर्याति। स चेत् सुभूते सकृदा-
गामिधर्म्माभावोऽभविष्यन्नाभावो नेदं महायानं स देवमानुषासुरं
लोकमभिभूयनिरयास्यत्। यस्मात्तर्हि सुभूते सकृदागामिधर्म्मा
अभावो न भावस्तस्मान्महायानं स देवमानुषासुरं लोकमभिभूय-
निर्याति। स चेत् सुभूते अनागामिधर्म्माभावोऽभविष्यन्नाभावो

PK
81
B5
no. 153
v. 2,
pt. 1

902301

# अथ त्रयोदशः परिवर्त्तः ।

पृथिवीधात्वसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति । पृथिवीधातुशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । पृथिवीधातुविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । पृथिवीधात्वस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । पृथिवीधात्वसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति । पृथिवीधातुशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति । पृथिवीधातुविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति । पृथिवीधात्वस्वभावतयाऽपरान्ततो बोधिसत्वो नोपैति । पृथिवीधात्वसत्तया मध्यतो बोधिसत्त्वो नोपैति । पृथिवीधातुशून्यतया मध्यतो बोधिसत्त्वो नोपैति । पृथिवीधातुविविक्ततया मध्यतो बोधिसत्त्वो नोपैति । पृथिवीधात्वस्वभावतया मध्यतो बोधिसत्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र पृथिवीधात्वसत्तायां पृथिवीधातुशून्यतायां पृथिवीधातुविविक्तायां पृथिवीधात्वस्वभावतायां पूर्व्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । न चान्या पृथिवीधात्वसत्ताऽन्या पृथिवीधातुशून्यताऽन्या पृथिवीधातुविविक्तताऽन्या पृथिवीधात्वस्वभावता । अन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति । ह्यायुष्मञ्छारद्वतीपुत्र या च पृथिवीधात्वसत्ता या च पृथिवीधातुशून्यता या च पृथिवीधातुविविक्तता या च पृथिवी-

धात्वस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ।

अब्धात्वसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अब्धातुशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । अब्धातुविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । अब्धात्वस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अब्धात्वसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। अब्धातुशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। अब्धातुविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। अब्धात्वस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति । अब्धात्वसत्तया मध्यतो बोधिसत्त्वो नोपैति । अब्धातुशून्यतया मध्यतो बोधिसत्त्वो नोपैति । अब्धातुविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। अब्धात्वस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्राब्धात्वसत्तयां । अब्धातुशून्यतयां । अब्धातुविविक्ततायां । अब्धात्वस्वभावतायां पूर्व्वान्त उपलभ्यते । नापरान्त उपलभ्यते । न मध्यमुपलभ्यते । न चाऽन्याऽब्धात्वसत्ताऽन्याऽब्धातुशून्यताऽन्याऽब्धातुविविक्तताऽन्याऽब्धातुस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति । ह्यायुष्मञ्छारद्वतीपुत्र या चाऽब्धात्वसत्ता या चाऽब्धातुशून्यता या चाऽब्धातुविविक्तता या चाब्धात्वस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरन्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ॥

तेजोधात्वसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपति । तेजोधातुशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । तेजोधातुविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। तेजोधात्वस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । तेजोधात्वसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति । तेजोधातुशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति । तेजोधातुविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति । तेजोधात्वस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति । तेजोधात्वसत्तयामध्यतो बोधिसत्त्वो नोपैति। तेजोधातुशून्यतया मध्यतो बोधिसत्त्वो नोपैति । तेजोधातुविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। तेजोधात्वस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र तेजोधात्वसत्तयां तेजोधातुशून्यतायां तेजोधातुविविक्ततायां तेजोधात्वस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते । न चान्या तेजोधात्वसत्ताऽन्या तेजोधातुशून्यताऽन्या तेजोधातुविविक्तताऽन्या तेजोधात्वस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति । ह्यायुष्मञ्छारद्वतीपुत्र या च तेजोधात्वसत्ता या च तेजोधातुशून्यता या च तेजोधातुविविक्तता या च तेजोधात्वस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ।



वायुधात्वसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति । वायुधातुशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । वायुधात्वस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। वायुधात्वसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। वायुधातुशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। वायुधातुविविक्ततयाऽपरान्ततो बोधिसत्त्वो

नोपैति । वायुधात्वस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति । वायुधात्वसत्तया मध्यतो बोधिसत्त्वो नोपैति । वायुधातुशून्यतया मध्यतो बोधिसत्त्वो नोपैति । वायुधातुविविक्ततया मध्यतो बोधिसत्त्वो नोपैति । वायुधात्वस्वभावतया मध्यतो बोधिसत्त्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र वायुधात्वसत्तायां वायुधातुशून्यतायां वायुधातुविविक्ततायां वायुधात्वस्वभावतायां पूर्व्वान्त उपलभ्यते । नापरान्त उपलभ्यते । न मध्यमुपलभ्यते । न चान्या वायुधात्वसत्ताऽन्या वायुधातुशून्यताऽन्या वायुधातुविविक्तताऽन्या वायुधात्वस्वभावताऽन्यो बोधिसत्त्वोन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च वायुधात्वसत्ता या च वायुधातुशून्यता या च वायुधातुविविक्तता या च वायुधात्वस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतद्द्वयमद्वैधीकारम् ।

आकाशधात्वसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति । आकाशधातुशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । आकाशधातुविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । आकाशधात्वस्वभावतयापूर्व्वान्ततो बोधिसत्त्वो नोपैति । आकाशधात्वसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति । आकाशधातुशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति । आकाशधातुविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति । आकाशधात्वस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति । आकाशधात्वसत्तया मध्यतो बोधिसत्त्वो नोपैति । आकाशधातुशून्यतया मध्यतो बोधिसत्त्वो नोपैति । आकाशधातु-



विविक्ततया मध्यतो बोधिसत्त्वो नोपैति । आकाशधात्वस्वभावतया मध्यतो बोधिसत्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्राकाशधात्वसत्तायामाकाशधातुशून्यतायामाकाशधातुविविक्ततायामाकाशधात्वस्वभावतायां पूर्ब्बान्त उपलभ्यते नापरान्त उपलभ्यते न मध्यमुपलभ्यते । न चान्या आकाशधात्वसत्ताऽन्या आकाशधातुशून्यताऽन्या आकाशधातुविविक्तताऽन्या आकाशधात्वस्वभावता अन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या चाकाशधात्वसत्ता या चाकाश धातुशून्यता या चाकाशधातुविविक्तता या चाकाशधात्वस्वभावता यश्च बोधिसत्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतद्द्वयमद्वैधीकारम् ।

विज्ञानधात्वसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति । विज्ञानधातुशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । विज्ञानधातुविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । विज्ञानधात्वस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । विज्ञानधात्वसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति । विज्ञानधातुशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति । विज्ञानधातुविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति । विज्ञानधात्वस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति । विज्ञानधात्वसत्तया मध्यतो बोधिसत्त्वो नोपैति । विज्ञानधातुशून्यतया मध्यतो बोधिसत्त्वो नोपैति । विज्ञानधातुविविक्ततया मध्यतो बोधिसत्त्वो नोपैति । विज्ञानधात्वस्वभावतया मध्यतो बोधिसत्त्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र

ताऽन्या वेदनाविविक्तताऽन्या वेदनाऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च वेदनाऽसत्ता या च वेदनाशून्यता या च वेदनाविविक्तता या च वेदनाऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ।

तृष्णाऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति । तृष्णाशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । तृष्णाविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । तृष्णाऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । तृष्णाऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति । तृष्णाशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति । तृष्णाविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति । तृष्णाऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति । तृष्णाऽसत्तया मध्यतो बोधिसत्त्वो नोपैति । तृष्णाशून्यतया मध्यतो बोधिसत्त्वो नोपैति । तृष्णाविविक्ततया मध्यतो बोधिसत्त्वो नोपैति । तृष्णाऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र तृष्णाऽसत्तायां तृष्णाशून्यतायां तृष्णाविविक्ततायां तृष्णाऽस्वभावतायां पूर्व्वान्त उपलभ्यते । नापरान्त उपलभ्यते । न मध्यमुपलभ्यते । न चाऽन्या तृष्णाऽसत्ताऽन्या तृष्णाशून्यताऽन्या तृष्णाविविक्तताऽन्या तृष्णाऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च तृष्णाऽसत्ता या च तृष्णाशून्यता या च तृष्णाविविक्तता या च तृष्णाऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ।



उपादानाऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति । उपादानशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । उपादानविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । उपादानाऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । उपादानाऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति । उपादानशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति । उपादानविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति । उपादानाऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति । उपादानाऽसत्तया मध्यतो बोधिसत्त्वो नोपैति । उपादानशून्यतया मध्यतो बोधिसत्त्वो नोपैति । उपादानविविक्ततया मध्यतो बोधिसत्त्वो नोपैति । उपादानाऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र उपादानाऽसत्तायामुपादानशून्यतायामुपादानविविक्ततायामुपादानाऽस्वभावतायां पूर्व्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । न चाऽन्या उपादानाऽसत्तान्या उपादानशून्यताऽन्या उपादानविविक्तताऽन्या उपादानाऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या चोपादानाऽसत्ता या चोपादानशून्यता या चोपादानविविक्तता या चोपादानाऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ।

भवासत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वाऽन्ततो बोधिसत्त्वो नोपैति । भवशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । भवविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । भवाऽस्वभावतया पूर्व्वान्ततो बोधि-

सत्त्वो नोपैति। भवाऽसत्त्वयाऽपरान्ततो बोधिसत्त्वो नोपैति। भवशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। भवविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। भवाऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। भवासत्त्वया मध्यतो बोधिसत्त्वो नोपैति। भवशून्यतया मध्यतो बोधिसत्त्वो नोपैति। भवविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। भवाऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र भवाऽसत्तायां भवशून्यतायां भवविविक्ततायां भवाऽस्वभावतायां पूर्व्वान्त उपलभ्यते नापरान्त उपलभ्यते न मध्यमुपलभ्यते। न चान्या भवाऽसत्ताऽन्या भवशून्यताऽन्या भवविविक्तताऽन्या भवाऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च भवाऽसत्ता या च भवशून्यता या च भवविविक्तता या च भवाऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

जात्यसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। जातिशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। जातिविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। जात्यस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। जात्यसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। जातिशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। जातिविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। जात्यस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। जात्यसत्तया मध्यतो बोधिसत्त्वो नोपैति। जातिशून्यतया मध्यतो बोधिसत्त्वो नोपैति। जातिविविक्ततया



मध्यतो बोधिसत्त्वो नोपैति। जात्यस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र जात्यसत्तायां जातिशून्यतायां जातिविविक्ततायां जात्यस्वभावतायां पूर्व्वान्त उपलभ्यते। नापरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या जात्यसत्ताऽन्या जातिशून्यताऽन्या जातिविविक्तताऽन्या जात्यस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च जात्यसत्ता या च जातिशून्यता या च जातिविविक्तता या च जात्यस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

जरामरणाऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। जरामरणशून्यतया पूर्व्वान्ततो बोधिसत्लो नोपैति। जरामरणविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। जरामरणाऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। जरामरणाऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। जरामरणशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। जरामरणविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। जरामरणाऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। जरामरणाऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। जरामरणशून्यतया मध्यतो बोधिसत्त्वो नोपैति। जरामरणविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। जरामरणाऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र जरामरणाऽसत्तायां जरामरणशून्यतायां जरामरणविविक्ततायां जरा-

मरणाऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या जरामरणाऽसत्ताऽन्या जरामरणशून्यताऽन्या जरामरणविविक्तताऽन्या जरामरणाऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च जरामरणाऽसत्ता या च जरामरणशून्यता या च जरामरणविविक्तता या च जरामरणाऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

दानपारमिताऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। दानपारमिताशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। दानपारमिताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। दानपारमिताऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। दानपारमिताऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। दानपारमिताशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। दानपारमिताविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। दानपारमिताऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। दानपारमिताऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। दानपारमिताशून्यतया मध्यतो बोधिसत्त्वो नोपैति। दानपारमिताविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। दानपारमिताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र दानपारमिताऽसत्तायां दानपारमिताशून्यतायां दानपारमिताविविक्ततायां दानपारमिताऽस्वभावतायां पूर्व्वान्त उपलभ्यते नाऽपरान्त उपलभ्यते, न मध्यमुपलभ्यते। न



चाऽन्या दानपारमिताऽसत्ताऽन्या दानपारमिताशून्यताऽन्या दानपारमिताविविक्तताऽन्या दानपारमिताऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च दानपारमिताऽसत्ता या च दानपारमिताशून्यता या च दानपारमिताविविक्तता या च दानपारमिताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

शीलपारमिताऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। शीलपारमिताशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। शीलपारमिताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। शीलपारमिताऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। शीलपारमिताऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। शीलपारमिताशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। शीलपारमिताविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। शीलपारमिताऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। शीलपारमिताऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। शीलपारमिताशून्यतया मध्यतो बोधिसत्त्वो नोपैति। शीलपारमिताविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। शीलपारमिताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र शीलपारमिताऽसत्तायां शीलपारमिताशून्यतायां शीलपारमिताविविक्ततायां शीलपारमिताऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नापरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या शीलपारमिताऽसत्ताऽन्या शीलपारमिता-

शून्यताऽन्या शीलपारमिताविविक्तताऽन्या शीलपारमिताऽस्वभावताऽन्यो बोधिसत्त्वोन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च शीलपारमिताऽसत्ता या च शीलपारमिताशून्यता या च शीलपारमिताविविक्तता या च शीलपारमिताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चापरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ॥

क्षान्तिपारमिताऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति । क्षान्तिपारमिताशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । क्षान्तिपारमिताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । क्षान्तिपारमिताऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । क्षान्तिपारमिताऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति । क्षान्तिपारमिताशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति । क्षान्तिपारमिताविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति । क्षान्तिपारमिताऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति । क्षान्तिपारमिताऽसत्तया मध्यतो बोधिसत्त्वो नोपैति । क्षान्तिपारमिताशून्यतया मध्यतो बोधिसत्त्वो नोपैति । क्षान्तिपारमिताविविक्ततया मध्यतो बोधिसत्त्वो नोपैति । क्षान्तिपारमिताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र क्षान्तिपारमिताऽसत्तायां क्षान्तिपारमिताशून्यतायां क्षान्तिपारमिताविविक्ततायां क्षान्तिपारमिताऽस्वभावतायां पूर्व्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । न चाऽन्या क्षान्तिपारमिताऽसत्ताऽन्या क्षान्तिपारमिताशून्यताऽन्या क्षान्ति-



पारमिताविविक्तताऽन्या क्षान्तिपारमिताऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च क्षान्तिपारमिताऽसत्ता या च क्षान्तिपारमिताशून्यता या च क्षान्तिपारमिताविविक्तता या च क्षान्तिपारमिताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चापरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ।

वीर्य्यपारमिताऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति । वीर्य्यपारमिताशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । वीर्य्यपारमिताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । वीर्य्यपारमिताऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । वीर्य्यपारमिताऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति । वीर्य्यपारमिताशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति । वीर्य्यपारमिताविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति । वीर्य्यपारमिताऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति । वीर्य्यपारमिताऽसत्तया मध्यतो बोधिसत्त्वो नोपैति । वीर्य्यपारमिताशून्यतया मध्यतो बोधिसत्त्वो नोपैति । वीर्य्यपारमिताविविक्ततया मध्यतो बोधिसत्त्वो नोपैति । वीर्य्यपारमिताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र वीर्य्यपारमिताऽसत्तायां वीर्य्यपारमिताशून्यतायां वीर्य्यपारमिताविविक्ततायां वीर्य्यपारमिताऽस्वभावतायां पूर्व्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । न चाऽन्या वीर्य्यपारमिताऽसत्ताऽन्या वीर्य्यपारमिताशून्यताऽन्या वीर्य्यपारमिताविविक्तताऽन्या वीर्य्यपार-

मिताऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्य-
न्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च वीर्य्यपारमिताऽसत्ता या
च वीर्य्यपारमिताशून्यता या च वीर्य्यपारमिताविविक्तता या च
वीर्य्यपारमिताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चा-
ऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ।

ध्यानपारमिताऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधि-
सत्त्वो नोपैति । ध्यानपारमिताशून्यतया पूर्व्वान्ततो बोधिसत्त्वो
नोपैति । ध्यानपारमिताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो
नोपैति । ध्यानपारमिताऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो
नोपैति । ध्यानपारमिताऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति ।
ध्यानपारमिताशून्यतायाऽपरान्ततो बोधिसत्त्वो नोपैति । ध्यान-
पारमिताविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति । ध्यानपार-
मिताऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति । ध्यानपार-
मिताऽसत्तया मध्यतो बोधिसत्त्वो नोपैति । ध्यानपारमिताशून्य-
तया मध्यतो बोधिसत्त्वो नोपैति । ध्यानपारमिताविविक्ततया
मध्यतो बोधिसत्त्वो नोपैति । ध्यानपारमिताऽस्वभावतया मध्यतो
बोधिसत्त्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र ध्यान-
पारमिताऽसत्तायां ध्यानपारमिताशून्यतायां ध्यानपारमिता-
विविक्ततायां ध्यानपारमिताऽस्वभावतायां पूर्व्वान्त उपलभ्यते ।
नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । न चाऽन्या ध्यानपार-
मिताऽसत्ताऽन्या ध्यानपारमिताशून्यताऽन्या ध्यानपारमिता-
विविक्तताऽन्या ध्यानपारमिताऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः



पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च
ध्यानपारमिताऽसत्ता या च ध्यानपारमिताशून्यता या च ध्यान-
पारमिताविविक्तता या च ध्यानपारमिताऽस्वभावता यश्च बोधि-
सत्त्वो यश्च पूर्व्वान्तो यश्चापरान्तो यच्च मध्यं सर्व्वमेतदद्वय-
मद्वैधीकारम् ।

प्रज्ञापारमिताऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो
नोपैति । प्रज्ञापारमिताशून्यताया पूर्व्वान्ततो बोधिसत्त्वो नोपैति ।
प्रज्ञापारमिताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति ।
प्रज्ञापारमिताऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति ।
प्रज्ञापारमिताऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति । प्रज्ञापार-
मिताशून्यतायाऽपरान्ततो बोधिसत्त्वो नोपैति । प्रज्ञापारमिता-
विविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति । प्रज्ञापारमिताऽस्व-
भावतयाऽपरान्ततो बोधिसत्त्वो नोपैति । प्रज्ञापारमिताऽसत्तया
मध्यतो बोधिसत्त्वो नोपैति । प्रज्ञापारमिताशून्यताया मध्यतो
बोधिसत्त्वो नोपैति । प्रज्ञापारमिताविविक्ततया मध्यतो बोधिसत्त्वो
नोपैति । प्रज्ञापारमिताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति ।
तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र प्रज्ञापारमिताऽसत्तायां
प्रज्ञापारमिताशून्यतायां प्रज्ञापारमिताविविक्ततायां प्रज्ञापार-
मिताऽस्वभावतायां पूर्व्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते ।
न मध्यमुपलभ्यते । न चाऽन्या प्रज्ञापारमिताऽसत्ताऽन्या प्रज्ञा-
पारमिताशून्यताऽन्या प्रज्ञापारमिताविविक्तताऽन्या प्रज्ञापार-
मिताऽस्वभावताऽन्यो बोधिसत्त्वोन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्य-

न्मध्यमिति शारद्वतीपुत्र या च प्रज्ञापारमिताऽसत्त्वा या च प्रज्ञापारमिताशून्यता या च प्रज्ञापारमिताविविक्तता या च प्रज्ञापारमिताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्वमेतदद्वयमद्वैधीकारम् ।

अध्यात्मशून्यताऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्वान्ततो बोधिसत्त्वो नोपैति । आध्यात्मशून्यताशून्यतया पूर्वान्ततो बोधिसत्त्वो नोपैति । अध्यात्मशून्यताविविक्ततया पूर्वान्ततो बोधिसत्त्वो नोपैति । अध्यात्मशून्यताऽस्वभावतया पूर्वान्तो बोधिसत्त्वो नोपैति । अध्यात्मशून्यताऽसत्तयापरान्ततो बोधिसत्त्वो नोपैति । अध्यात्मशून्यताशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति । अध्यात्मशून्यताविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति । अध्यात्मशून्यताऽस्वभावतयापरान्ततो बोधिसत्त्वो नोपैति । अध्यात्मशून्यताऽसत्तया मध्यतो बोधिसत्त्वो नोपैति । अध्यात्मशून्यताशून्यतया मध्यतो बोधिसत्त्वो नोपैति । अध्यात्मशून्यताविविक्ततया मध्यतो बोधिसत्त्वो नोपैति । अध्यात्मशून्यताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति । तत्कस्य हेतोर्न शारद्वतीपुत्राऽध्यात्मशून्यताऽसत्तायां अध्यात्मशून्यताशून्यतायां अध्यात्मशून्यताविविक्ततायां अध्यात्मशून्यताऽस्वभावतायां पूर्वान्त उपलभ्यते । नाऽपरान्त उप-उपलभ्यते । न मध्यमुपलभ्यते । न चाऽन्याऽध्यात्मशून्यताऽसत्ताऽन्या अध्यात्मशून्यताशून्यताऽन्या अध्यात्मशून्यताविविक्तताऽन्या अध्यात्मशून्यताऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति शारद्वतीपुत्र या चाऽध्यात्मशून्यताऽसत्ता



या चाऽध्यात्मशून्यताशून्यता या चाऽध्यात्मशून्यताविविक्तता या चाध्यात्मशून्यताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्वान्तो यश्चापरान्तो यच्च मध्यं सर्वमेतदद्वयमद्वैधीकारम् ।

बहिर्द्धाशून्यताऽसत्ततायुष्मञ्छारद्वतीपुत्र पूर्वान्ततो बोधिसत्त्वो नोपैति । बहिर्द्धाशून्यताशून्यतया पूर्वान्ततो बोधिसत्त्वो नोपैति । बहिर्द्धाशून्यताविविक्ततया पूर्वान्ततो बोधिसत्त्वो नोपैति । बहिर्द्धाशून्यताऽस्वभावतया पूर्वान्ततो बोधिसत्त्वो नोपैति । बहिर्द्धाशून्यताऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति । बहिर्द्धाशून्यताशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति । बहिर्द्धाशून्यताविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति । बहिर्द्धाशून्यताऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति । बहिर्द्धाशून्यताऽसत्तया मध्यतो बोधिसत्त्वो नोपैति । बहिर्द्धाशून्यताशून्यतया मध्यतो बोधिसत्त्वो नोपैति । बहिर्द्धाशून्यताविविक्ततया मध्यतो बोधिसत्त्वो नोपैति । बहिर्द्धाशून्यतास्वभावतया मध्यतो बोधिसत्त्वो नोपैति । तत्कस्य हेतोर्न शारद्वतीपुत्र बहिर्द्धाशून्यताऽसत्तायां बहिर्द्धाशून्यताशून्यतायां बहिर्द्धाशून्यताविविक्तायां बहिर्द्धाशून्यताऽस्वभावतायां पूर्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । न चाऽन्या बहिर्द्धाशून्यताऽसत्ताऽन्या बहिर्द्धाशून्यताशून्यताऽन्या बहिर्द्धाशून्यताविविक्तताऽन्या बहिर्द्धाशून्यताऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति शारद्वतीपुत्र या च बहिर्द्धाशून्यताऽसत्ता या च बहिर्द्धाशून्यताशून्यता या च बहिर्द्धाशून्यता-

विविक्तता या च बहिर्द्धाशून्यताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ॥

अध्यात्मबहिर्द्धाशून्यताऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति । अध्यात्मबहिर्द्धाशून्यताशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । अध्यात्मबहिर्द्धाशून्यताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । अध्यात्मबहिर्द्धाशून्यताऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । अध्यात्मबहिर्द्धाशून्यताऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति । अध्यात्मबहिर्द्धाशून्यताशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति । अध्यात्मबहिर्द्धाशून्यताविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति । अध्यात्मबहिर्द्धाशून्यताऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति । अध्यात्मबहिर्द्धाशून्यताऽसत्तया मध्यतो बोधिसत्त्वो नोपैति । अध्यात्मबहिर्द्धाशून्यताशून्यतया मध्यतो बोधिसत्त्वो नोपैति । अध्यात्मबहिर्द्धाशून्यताविविक्ततया मध्यतो बोधिसत्त्वो नोपैति । अध्यात्मबहिर्द्धाशून्यताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्राध्यात्मबहिर्द्धाशून्यताऽसत्तायामध्यात्मबहिर्द्धाशून्यताशून्यतायामध्यात्मबहिर्द्धाशून्यताविविक्ततायामध्यात्मबहिर्द्धाशून्यताऽस्वभावतायां पूर्व्वान्त उपलभ्यते । नापरान्त उपलभ्यते । न मध्यमुपलभ्यते । न चाऽन्या अध्यात्मबहिर्द्धाशून्यताऽसत्ताऽन्याऽध्यात्मबहिर्द्धाशून्यताशून्यताऽन्याऽध्यात्मबहिर्द्धाशून्यताविविक्तताऽन्याऽध्यात्मबहिर्द्धाशून्यताऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या चाऽध्यात्मबहिर्द्धाशून्यताऽसत्ता या चाध्यात्म-



बहिर्द्धाशून्यताशून्यता या चाध्यात्मबहिर्द्धाशून्यताविविक्तता या चाध्यात्मबहिर्द्धाशून्यताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ॥

शून्यताशून्यताऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति । शून्यताशून्यताशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । शून्यताशून्यताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । शून्यताशून्यताऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । शून्यताशून्यताऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति । शून्यताशून्यताशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति । शून्यताशून्यताविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति । शून्यताशून्यताऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति । शून्यताशून्यताऽसत्तया मध्यतो बोधिसत्त्वो नोपैति । शून्यताशून्यताशून्यतया मध्यतो बोधिसत्त्वो नोपैति । शून्यताशून्यताविविक्ततया मध्यतो बोधिसत्त्वो नोपैति । शून्यताशून्यताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र शून्यताशून्यताऽसत्तायां शून्यताशून्यताशून्यतायां शून्यताशून्यताविविक्ततायां शून्यताशून्यताऽस्वभावतायां पूर्व्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । न चाऽन्या शून्यताशून्यताऽसत्ताऽन्या शून्यताशून्यताशून्यताऽन्या शून्यताशून्यताविविक्तताऽन्या शून्यताशून्यताऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च शून्यताशून्यताऽसत्ता या च शून्यताशून्यताशून्यता या च शून्यताशून्यताविविक्तता या च शून्यताशून्यताऽस्वभावता यश्च

बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ॥

महाशून्यताऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। महाशून्यताशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। महाशून्यताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। महाशून्यताऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। महाशून्यताऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। महाशून्यताशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। महाशून्यताविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। महाशून्यताऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। महाशून्यताऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। महाशून्यताशून्यतया मध्यतो बोधिसत्त्वो नोपैति। महाशून्यताविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। महाशून्यताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र महाशून्यताऽसत्तायां महाशून्यताशून्यतायां महाशून्यताविविक्ततायां महाशून्यताऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या महाशून्यताऽसत्ताऽन्या महाशून्यताशून्यताऽन्या महाशून्यताविविक्तताऽन्या महाशून्यताऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च महाशून्यताऽसत्ता या च महाशून्यताशून्यता या च महाशून्यताविविक्तता या च महाशून्यताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ॥



परमार्थशून्यताऽसत्तया युष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। परमार्थशून्यताशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। परमार्थशून्यताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। परमार्थशून्यताऽस्वभावतया पूर्व्वाऽन्ततो बोधिसत्त्वो नोपैति। परमार्थशून्यताऽसत्तयापरान्ततो बोधिसत्त्वो नोपैति। परमार्थशून्यताशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। परमार्थशून्यताविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। परमार्थशून्यताऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। परमार्थशून्यताऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। परमार्थशून्यताशून्यतया मध्यतो बोधिसत्त्वो नोपैति। परमार्थशून्यताविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। परमार्थशून्यताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र परमार्थशून्यताऽसत्तायां परमार्थशून्यताशून्यतायां परमार्थशून्यताविविक्ततायां परमार्तशून्यताऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या परमार्थशून्यताऽसत्ताऽन्या परमार्थशून्यताशून्यताऽन्या परमार्थशून्यताविविक्तताऽन्या पतमार्थशून्यताऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च परमार्थशून्यताऽसत्ता या च परमार्थशून्यताशून्यता या च परमार्थशून्यताविविक्तता या च परमार्थशून्यताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ॥

संस्कृतशून्यताऽसत्तया युष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। संस्कृतशून्यता शून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। संस्कृतशून्यताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। संस्कृतशून्यताऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। संस्कृतशून्यताऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। संस्कृतशून्यताशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। संस्कृतशून्यताविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। संस्कृतशून्यताऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। संस्कृतशून्यताऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। संस्कृतशून्यताशून्यतया मध्यतो बोधिसत्त्वो नोपैति। संस्कृतशून्यताविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। संस्कृतशून्यताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र संस्कृतशून्यता सत्तायां संस्कृतशून्यताशून्यतायां संस्कृतशून्यताविविक्ततायां संस्कृतशून्यताऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नापरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या संस्कृतशून्यताऽसत्ताऽन्या संस्कृतशून्यताशून्यताऽन्या संस्कृतशून्यताविविक्तताऽन्या संस्कृतशून्यताऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या च संस्कृतशून्यताऽसत्ता या च संस्कृतशून्यताशून्यता या च संस्कृतशून्यताविविक्तता या च संस्कृतशून्यताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चापरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

असंस्कृतशून्यताऽसत्तया, युष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधि-



सत्त्वो नोपैति। असंस्कृतशून्यताशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। असंस्कृतशून्यताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। असंस्कृतशून्यताऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। असंस्कृतशून्यताऽसत्तया ऽपरान्ततो बोधिसत्त्वो नोपैति। असंस्कृतशून्यताशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। असंस्कृतशून्यताविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। असंस्कृतशून्यताऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। असंस्कृतशून्यताऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। असंस्कृतशून्यताशून्यतया मध्यतो बोधिसत्त्वो नोपैति। असंस्कृतशून्यताविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। असंस्कृतशून्यताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्राऽसंस्कृतशून्यताऽसत्तायामसंस्कृतशून्यताशून्यतायामसंस्कृतशून्यताविविक्ततायामसंस्कृतशून्यताऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नापरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्याऽसंस्कृतशून्यताऽसत्ताऽन्याऽसंस्कृतशून्यताशून्यताऽन्याऽसंस्कृतशून्यताविविक्तताऽन्याऽसंस्कृतशून्यताऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति। ह्यायुष्मञ्छारद्वतीपुत्र या चाऽसंस्कृतशून्यताऽसत्ता या चाऽसंस्कृतशून्यताशून्यता या चाऽसंस्कृतशून्यताविविक्तता या चाऽसंस्कृतशून्यताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

अत्यन्तशून्यताऽसत्तया, युष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अत्यन्तशून्यताशून्यतया पूर्व्वान्ततो बोधिसत्त्वो

नोपैति। अत्यन्तशून्यताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अत्यन्तशून्यताऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अत्यन्तशून्यताऽसत्त्वयाऽपरान्ततो बोधिसत्त्वो नोपैति। अत्यन्तशून्यताशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। अत्यन्तशून्यताविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। अत्यन्तशून्यताऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। अत्यन्तशून्यताऽसत्त्वया मध्यतो बोधिसत्त्वो नोपैति। अत्यन्तशून्यताशून्यतया मध्यतो बोधिसत्त्वो नोपैति। अत्यन्तशून्यताविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। अत्यन्तशून्यताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्रात्यन्तशून्यता ऽसत्त्वायामत्यन्तशून्यताशून्यतायामत्यन्तशून्यताविविक्ततायामत्यन्तशून्यता ऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या ऽत्यन्तशून्यता ऽसत्त्वाऽन्या ऽत्यन्तशून्यताशून्यता ऽन्या ऽत्यन्तशून्यताविविक्तोऽन्या ऽत्यन्तशून्यता ऽस्वभावताऽन्यो बोधिसत्त्वो ऽन्यः पूर्वान्तोऽन्यो ऽपरान्तो ऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या चाऽत्यन्तशून्यता ऽसत्त्वा या चात्यन्तशून्यताशून्यताया चात्यन्तशून्यताविविक्तो या चाऽत्यन्तशून्यताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्वान्तो यश्चापरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

अनवराग्रशून्यता ऽसत्त्वया युष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अनवराग्रशून्यता शून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अनवराग्रशून्यता विविक्ततया पूर्व्वान्ततो बोधिसत्त्वो



नोपैति। अनवराग्रशून्यता ऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अनवराग्रशून्यता ऽसत्त्वया ऽपरान्ततो बोधिसत्त्वो नोपैति। अनवराग्रशून्यता शून्यतया ऽपरान्ततो बोधिसत्त्वो नोपैति। अनवराग्रशून्यता विविक्ततया ऽपरान्ततो बोधिसत्त्वो नोपैति। अनवराग्रशून्यता ऽस्वभावतया ऽपरान्ततो बोधिसत्त्वो नोपैति। अनवराग्रशून्यता ऽसत्त्वया मध्यतो बोधिसत्त्वो नोपैति। अनवराग्रशून्यता शून्यतया मध्यतो बोधिसत्त्वो नोपैति। अनवराग्रशून्यता विविक्ततया मध्यतो बोधिसत्त्वो नोपैति। अनवराग्रशून्यता ऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्रा ऽनवराग्रशून्यता ऽसत्त्वयामनवराग्रशून्यता शून्यतयामनवराग्रशून्यता विविक्ततया मनवराग्रशून्यतया ऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नाऽपरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या ऽनवराग्रशून्यता ऽसत्त्वा ऽन्या ऽनवराग्रशून्यता शून्यता ऽन्या ऽनवराग्रशून्यता विविक्तता ऽन्या ऽनवराग्रशून्यता ऽस्वभावता ऽन्यो बोधिसत्त्वो ऽन्यः पूर्व्वान्तो ऽन्यो ऽपरान्तो ऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या चानवराग्रशून्यता ऽसत्त्वा या चानऽवराग्रशून्यता शून्यता या चानवराग्रशून्यता विविक्तता या चाऽनवराग्रशून्यता ऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चा ऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

अनवकारशून्यताऽसत्त्वयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अनवकारशून्यता शून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अनवकारशून्यता विविक्ततया पूर्व्वान्ततो बोधिसत्त्वो

नोपैति । अनवकारशून्यता ऽस्वभावतया पूर्वान्ततो बोधिसत्त्वो नोपैति । अनवकारशून्यता ऽसत्तया ऽपरान्ततो बोधिसत्त्वो नोपैति । अनवकारशून्यता शून्यतया ऽपरान्ततो बोधिसत्त्वो नोपैति । अनवकारशून्यता विविक्ततया ऽपरान्ततो बोधिसत्त्वो नोपैति । अनवकारशून्यता ऽस्वभावतया ऽपरान्ततो बोधिसत्त्वो नोपैति । अनवकारशून्यता ऽसत्तया मध्यतो बोधिसत्त्वो नोपैति । अनवकारशून्यताशून्यतया मध्यतो बोधिसत्त्वो नोपैति। अनवकारविविक्ततया मध्यतो बोधिसत्त्वो नोपैति । अनवकारशून्यता ऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्माञ्छरद्वतीपुत्रानवकारशून्यताऽसत्तायामनवकारशून्यताशून्यतायामनवकारशून्यता विविक्ततायामनवकारशून्यता ऽस्वभावतायां पूर्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । न चाऽन्या ऽनवकारशून्यता ऽसत्ता ऽन्या ऽनवकारशून्यताशून्यता ऽन्या ऽनवकारशून्यता विविक्तता ऽन्या ऽनवकारशून्यता ऽस्वभावता ऽन्यो बोधिसत्त्वो ऽन्यः पूर्वान्तो ऽन्यो ऽपरान्तो ऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या चाऽनवकारशून्यता ऽसत्ता या चाऽनवकारशून्यता शून्यता या चाऽनवकारशून्यता विविक्तता या चाऽनवकारशून्यता ऽस्वभावता यस्य बोधिसत्तो यस्य पूर्वान्तो यस्याऽपरान्तो यच्च मध्यं । सर्वमेतदद्वयमद्वैधीकारम् ।

प्रकृतिशून्यता ऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्वान्ततो बोधिसत्त्वो नोपैति । प्रकृतिशून्यता शून्यतया पूर्वान्ततो बोधिसत्त्वो नोपैति । प्रकृतिशून्यता विविक्ततया पूर्वान्ततो बोधिसत्त्वो नोपैति ।



प्रकृतिशून्यता ऽस्वभावतया पूर्वान्ततो बोधिसत्त्वो नोपैति । प्रकृतिशून्यता ऽसत्तया अपरान्ततो बोधिसत्त्वो नोपैति । प्रकृतिशून्यता शून्यतया ऽपरान्ततो बोधिसत्त्वो नोपैति । प्रकृतिशून्यता विविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति । प्रकृतिशून्यताऽस्वभावतयाऽपरान्ततो बोधिसत्वो नोपैति । प्रकृतिशून्यताऽसत्तया मध्यतो बोधिसत्त्वो नोपैति । प्रकृतिशून्यताशून्यतया मध्यतो बोधिसत्त्वो नोपैति । प्रकृतिशून्यताविविक्ततया मध्यतो बोधिसत्त्वो नोपैति । प्रकृतिशून्यताऽस्वभावतया मध्यतो बोधिसत्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र प्रकृतिशून्यताऽसत्तायां प्रकृतिशून्यताशून्यतायां प्रकृतिशून्यताविविक्ततायां प्रकृतिशून्यताऽस्वभावतायां पूर्व्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । न चाऽन्यो प्रकृतिशून्यताऽसत्ताऽन्या प्रकृतिशून्यताशून्यताऽन्या प्रकृतिशून्यताविविक्तताऽन्याप्रकृतिशून्यताऽस्वभावता अन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति । ह्यायुष्मञ्छारद्वतीपुत्र या च प्रकृतिशून्यताऽसत्ता या च प्रकृतिशून्यताशून्यता या च प्रकृतिशून्यताविविक्ततया या च प्रकृतिशून्यताऽस्वभावता यस्य बोधिसत्त्वो यस्य पूर्व्वान्तो यस्याऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ।

सर्व्वधर्म्मशून्यताऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति । सर्वधर्म्मशून्यताशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । सर्वधर्म्मशून्यताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । सर्वधर्म्मशून्यताऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । सर्व-

धर्म्मशून्यताऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति । सर्वधर्म्मशून्यताशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति । सर्वधर्म्मशून्यताविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति । सर्वधर्म्मशून्यताऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति । सर्वधर्म्मशून्यताऽसत्तया मध्यतो बोधिसत्त्वो नोपैति । सर्वधर्म्मशून्यताशून्यतया मध्यतो बोधिसत्त्वो नोपैति । सर्वधर्म्मशून्यताविविक्ततया मध्यतो बोधिसत्त्वो नोपैति । सर्वधर्म्मशून्यताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र सर्वधर्म्मशून्यताऽसत्तायां सर्वधर्म्मशून्यताशून्यतायां सर्वधर्म्मशून्यताविविक्ततायां सर्वधर्म्मशून्यताऽस्वभावतायां पूर्व्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । न चाऽन्या सर्वधर्म्मशून्यताऽसत्ताऽन्या सर्वधर्म्मशून्यताशून्यताऽन्या सर्वधर्म्मशून्यताविविक्तताऽन्या सर्वधर्म्मशून्यताऽस्वभावता अन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति । ह्यायुष्मञ्छारद्वतीपुत्र या च सर्वधर्म्मशून्यताऽसत्ता या च सर्वधर्म्मशून्यताशून्यता या च सर्वधर्म्मशून्यताविविक्तता या च सर्वधर्म्मशून्यताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चापरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ॥

स्वलक्षणशून्यताऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपति । स्वलक्षणशून्यताशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । स्वलक्षणशून्यताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । स्वलक्षणशून्यताऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । स्वलक्षणशून्यताऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति । स्वलक्षण-



शून्यताशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति । स्वलक्षणशून्यताविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति । स्वलक्षणशून्यताऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति । स्वलक्षणशून्यताऽसत्तया मध्यतो बोधिसत्त्वो नोपैति । स्वलक्षणशून्यताशून्यतया मध्यतो बोधिसत्त्वो नोपैति । स्वलक्षणशून्यताविविक्ततया मध्यतो बोधिसत्त्वो नोपैति । स्वलक्षणशून्यताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र स्वलक्षणशून्यताऽसत्तायां स्वलक्षणशून्यताशून्यतायां स्वलक्षणशून्यताविविक्ततायां स्वलक्षणशून्यताऽस्वभावतायां पूर्व्वान्त उपलभ्यते । नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । न चान्या स्वलक्षणशून्यताऽसत्ताऽन्या स्वलक्षणशून्यताशून्यताऽन्या स्वलक्षणशून्यताविविक्तताऽन्या स्वलक्षणशून्यताऽस्वभावता अन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति । ह्यायुष्मञ्छारद्वतीपुत्र या च स्वलक्षणशून्यताऽसत्ता या च स्वलक्षणशून्यताशून्यता या च स्वलक्षणशून्यताविविक्तता या च स्वलक्षणशून्यताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ।

अनुपलम्भशून्यताऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति । अनुपलम्भशून्यताशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । अनुपलम्भशून्यताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । अनुपलम्भशून्यताऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । अनुपलम्भशून्यताऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति । अनुपलम्भशून्यताशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति । अनुप-

लम्भशून्यताविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति । अनुपलम्भ-
शून्यताऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति । अनुपलम्भ-
शून्यताऽसत्त्वतया मध्यतो बोधिसत्त्वो नोपैति । अनुपलम्भशून्यता-
शून्यतया मध्यतो बोधिसत्त्वो नोपैति । अनुपलम्भशून्यताविविक्त-
तया मध्यतो बोधिसत्त्वो नोपैति । अनुपलम्भशून्यताऽस्वभावतया
मध्यतो बोधिसत्त्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र
अनुपलम्भशून्यताऽसत्त्वायामनुपलम्भशून्यताशून्यतायामनुपलम्भशून्य-
ताविविक्ततायामनुपलम्भशून्यताऽस्वभावतायां पूर्व्वान्त उपलभ्यते ।
नाऽपरान्त उपलभ्यते । न मध्यमुपलभ्यते । न चाऽन्याऽनुपलम्भ-
शून्यताऽसत्त्वाऽन्याऽनुपलम्भशून्यताशून्यताऽन्याऽनुपलम्भशून्यताविवि-
क्तताऽन्याऽनुपलम्भशून्यताऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तो-
ऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या चाऽनुपलम्भ-
शून्यताऽसत्त्वा या चाऽनुपलम्भशून्यताशून्यता या चाऽनुपलम्भशून्य-
ताविविक्तता या चाऽनुपलम्भशून्यताऽस्वभावता यश्च बोधिसत्त्वो यश्च
पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम् ।

अभावशून्यतासत्त्वयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो
नोपैति । अभावशून्यताशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति ।
अभावशून्यताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । अभाव-
शून्यताऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । अभावशून्यता-
ऽसत्त्वयाऽपरान्ततो बोधिसत्त्वो नोपैति । अभावशून्यताशून्यतयाऽप-
रान्ततो बोधिसत्त्वो नोपैति । अभावशून्यताविविक्ततयाऽपरान्ततो
बोधिसत्त्वो नोपैति । अभावशून्यताऽस्वभावतयाऽपरान्ततो बोधि-



सत्त्वो नोपैति । अभावशून्यताऽसत्त्वया मध्यतो बोधिसत्त्वो नोपैति ।
अभावशून्यताशून्यतया मध्यतो बोधिसत्त्वो नोपैति । अभावशून्यता-
विविक्ततया मध्यतो बोधिसत्त्वो नोपैति । अभावशून्यताऽस्वभावतया
मध्यतो बोधिसत्त्वो नोपैति । तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वती
पुत्र अभावशून्यताऽसत्त्वायामभावशून्यताशून्यतायामभावशून्यतावि-
विक्ततायामभावशून्यताऽस्वभावतायां पूर्व्वान्त उपलभ्यते । नापरान्त
उपलभ्यते । न मध्यमुपलभ्यते । न चाऽन्या अभावशून्यताऽसत्त्वाऽन्या
अभावशून्यताशून्यताऽन्या अभावशून्यताविविक्तताऽन्याऽभावशून्यता-
ऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति
ह्यायुष्मञ्छारद्वतीपुत्र या चाऽभावशून्यताऽसत्त्वा या चाऽभावशून्य-
ताशून्यता या चाऽभावशून्यताविविक्तता या चाऽभावशून्यताऽस्व-
भावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं
सर्व्वमेतदद्वयमद्वैधीकारम् ।

स्वभावशून्यताऽसत्त्वयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो
नोपैति । स्वभावशून्यताशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति ।
स्वभावशून्यताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । स्वभाव-
शून्यताऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति । स्वभावशून्यता-
ऽसत्त्वयाऽपरान्ततो बोधिसत्त्वो नोपैति । स्वभावशून्यताशून्यतया-
ऽपरान्ततो बोधिसत्त्वो नोपैति । स्वभावशून्यताविविक्ततयाऽपरा-
न्ततो बोधिसत्त्वो नोपैति । स्वभावशून्यताऽस्वभावतयाऽपरान्ततो
बोधिसत्त्वो नोपैति । स्वभावशून्यताऽसत्त्वया मध्यतो बोधिसत्त्वो
नोपैति । स्वभावशून्यताशून्यतया मध्यतो बोधिसत्त्वो नोपैति ।

स्वभावशून्यताविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। स्वभावशून्यताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र स्वभावशून्यताऽसत्तायां स्वभावशून्यताशून्यतायां स्वभावशून्यताविविक्ततायां स्वभावशून्यताऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नापरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्या स्वभावशून्यताऽसत्ताऽन्या स्वभावशून्यताशून्यताऽन्या स्वभावशून्यताविविक्तताऽन्या स्वभावशून्यताऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति। ह्यायुष्मञ्छारद्वतीपुत्र या च स्वभावशून्यताऽसत्ता या च स्वभावशून्यताशून्यता या च स्वभावशून्यताविविक्तता या च स्वभावशून्यताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

अभावस्वभावशून्यताऽसत्तयायुष्मञ्छारद्वतीपुत्र पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अभावस्वभावशून्यताशून्यतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अभावस्वभावशून्यताविविक्ततया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अभावस्वभावशून्यताऽस्वभावतया पूर्व्वान्ततो बोधिसत्त्वो नोपैति। अभावस्वभावशून्यताऽसत्तयाऽपरान्ततो बोधिसत्त्वो नोपैति। अभावस्वभावशून्यताशून्यतयाऽपरान्ततो बोधिसत्त्वो नोपैति। अभावस्वभावशून्यताविविक्ततयाऽपरान्ततो बोधिसत्त्वो नोपैति। अभावस्वभावशून्यताऽस्वभावतयाऽपरान्ततो बोधिसत्त्वो नोपैति। अभावस्वभावशून्यताऽसत्तया मध्यतो बोधिसत्त्वो नोपैति। अभावस्वभावशून्यताशून्यतया मध्यतो बोधिसत्त्वो



नोपैति। अभावस्वभावशून्यताविविक्ततया मध्यतो बोधिसत्त्वो नोपैति। अभावस्वभावशून्यताऽस्वभावतया मध्यतो बोधिसत्त्वो नोपैति। तत्कस्य हेतोर्न ह्यायुष्मञ्छारद्वतीपुत्र अभावस्वभावशून्यताऽसत्तायामभावस्वभावशून्यताशून्यतायामभावस्वभावशून्यताविविक्ततायामभावस्वभावशून्यताऽस्वभावतायां पूर्व्वान्त उपलभ्यते। नापरान्त उपलभ्यते। न मध्यमुपलभ्यते। न चाऽन्याऽभावस्वभावशून्यताऽसत्ताऽन्याऽभावस्वभावशून्यताशून्यताऽन्याऽभावस्वभावशून्यताविविक्तताऽन्याऽभावस्वभावशून्यताऽस्वभावताऽन्यो बोधिसत्त्वोऽन्यः पूर्व्वान्तोऽन्योऽपरान्तोऽन्यन्मध्यमिति ह्यायुष्मञ्छारद्वतीपुत्र या चाभावस्वभावशून्यताऽसत्ता या चाभावस्वभावशून्यताशून्यता या चाभावस्वभावशून्यताविविक्तता या चाभावस्वभावशून्यताऽस्वभावता यश्च बोधिसत्त्वो यश्च पूर्व्वान्तो यश्चाऽपरान्तो यच्च मध्यं सर्व्वमेतदद्वयमद्वैधीकारम्।

